# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ६६

नारदस्य तु तद्वाक्यं श्रुत्वामृतमयं यथा ।
प्रहर्षमतुलं लेभे लक्ष्मणं चेदमब्रवीत् ॥ १॥

गच्छ सौम्य द्विजश्रेष्ठं समाश्वासय लक्ष्मण ।
बालस्य च शरीरं तत्तैलद्रोण्यां निधापय ॥ २॥

गन्धैश्च परमोदारैस्तैलैश्च सुसुगन्धिभिः ।
यथा न क्षीयते बालस्तथा सौम्य विधीयताम् ॥ ३॥

यथा शरीरे बालस्य गुप्तस्याक्लिष्टकर्मणः ।
विपत्तिः परिभेदो वा भवेन्न च तथा कुरु ॥ ४॥

तथा सन्दिश्य काकुत्स्थो लक्ष्मणं शुभलक्षणम् ।
मनसा पुष्पकं दध्यावागच्छेति महायशाः ॥ ५॥

इङ्गितं स तु विज्ञाय पुष्पको हेमभूषितः ।
आजगाम मुहूर्तेन सम्पीपं राघवस्य वै ॥ ६॥

सोऽब्रवीत्प्रणतो भूत्वा अयमस्मि नराधिप ।
वश्यस्तव महाबाहो किङ्करः समुपस्थितः ॥ ७॥

भाषितं रुचिरं श्रुत्वा पुष्पकस्य नराधिपः ।
अभिवाद्य महर्षींस्तान्विमानं सोऽध्यरोहत ॥ ८॥

धनुर्गृहीत्वा तूणीं च खग्दं च रुचिरप्रभम् ।
निक्षिप्य नगरे वीरौ सौमित्रिभरतावुभौ ॥ ९॥

प्रायात्प्रतीचीं स मरून्विचिन्वंश्च समन्ततः ।
उत्तरामगमच्छ्रीमान्दिशं हिमवदावृतम् ॥ १०॥

अपश्यमानस्तत्रापि स्वल्पमप्यथ दुष्कृतम् ।
पूर्वामपि दिशं सर्वामथापश्यन्नराधिपः ॥ ११॥

दक्षिणां दिशमाक्रामत्ततो राजर्षिनन्दनः ।
शैवलस्योत्तरे पार्श्वे ददर्श सुमहत्सरः ॥ १२॥

तस्मिन्सरसि तप्यन्तं तापसं सुमहत्तपः ।
ददर्श राघवः श्रीमाँल्लम्बमानमधो मुखम् ॥ १३॥

अथैनं समुपागम्य तप्यन्तं तप उत्तमम् ।
उवाच राघवो वाक्यं धन्यस्त्वमसि सुव्रत ॥ १४॥

कस्यां योन्यां तपोवृद्धवर्तसे दृढविक्रम ।
कौतूहलात्त्वां पृच्छामि रामो दाशरथिर्ह्यहम् ॥ १५॥

मनीषितस्ते को न्वर्थः स्वर्गलाभो वराश्रयः ।
यमश्रित्य तपस्तप्तं श्रोतुमिच्छामि तापस ॥ १६॥

ब्राह्मणो वासि भद्रं ते क्षत्रियो वासि दुर्जयः ।
वैश्यो वा यदि वा शूद्रः सत्यमेतद्ब्रवीहि मे ॥ १७॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com